The planet Jupiter, the preceptor of gods 8.

1 2 3 4 5
वाचस्पतिराङ्गिरसो वृहस्पतिः कथ्यते गुरुर्जीवः ।
6 7 8
धिषणस्त्रिदशाचार्यश्चित्रशिखण्डिप्रसूतश्च ॥ ४७ ॥

The planet Venus, the preceptor of demons 7.

1 2 3 4 5 6 7
उशना शुक्रः काव्यो दैत्यगुरुर्भार्गवः कविर्धिष्ण्यः ।

The planet Saturn 6.

1 2a 3 4 5 6
असितः क्रोडः पङ्गुश्छायातनयः शनैश्चरः शौरिः ॥ ४८ ॥

A name of Rahu, ascending node 5.

1 2 3 4 5
स्वर्भानुः सैंहिकेयश्च तमो राहुर्विधुन्तुदः ।

A comet, descending node 3.

1 2 b 3
केतवः शिखिनः प्रोक्ता आर्द्रालुब्धक उच्यते ॥ ४९ ॥

The constellation Ursa Major,

1 2
सप्तर्षयस्तु विद्वद्भिः स्मृताश्चित्रशिखण्डिनः ।

Pleiades 2.

1 2 1 1 2
कृत्तिका बहुला प्रोक्ताः पक्षस्तु बहुलोऽसितः ॥ ५० ॥ Fortnight 1.

The dark half of the lunar month 2.

1 2 3 4
भं नक्षत्रं तारकं तारका च,

A star 9.

5 6 7 8c 9
ज्योतिस्तारा धिष्ण्यमृक्षं तथोडु ।

The eighth lunar asterism 2.

1 2 1 2
पुष्यस्तिष्यः स्याद्धनिष्ठा श्रविष्ठा , The 23rd lunar asterism 2.

27 Lunar asterism.

d 1 2
दाक्षायण्यः कीर्तिताश्चन्द्रदाराः ॥ ५१ ॥

Indra, the god of heaven.

1 2 3 4 5 6
इन्द्रो दुश्च्यवनो हरिः सुरपतिः सङ्क्रन्दनो वासवो ,
7 8 9 10 11
वृत्रारिर्बलसूदनः शतमखो वृद्धश्रवाः कौशिकः ।
12 13 14 15 16
जिष्णुर्वज्रधरः सहस्रनयनो वास्तोष्पतिर्गोपतिः ,
17 18 19 20 21
पर्जन्यो मघवा वृषा हरिहयः प्राचीनबर्हिः स्मृतः ॥ ५२ ॥
22 23 24 25 26
पुरुहूतः पृतनाषाट् पुरन्दरः पूर्वदिक्पतिः स्वाराट् ।
27 28 29 e 30 31
आखण्डलस्तुराषाट् सुत्रामा गोत्रभित्सुनासीरः ॥ ५३ ॥
32 f 33 34 35
शक्रः स्यादुग्रधन्वा च हरिवान्पाकशासनः ।
36 g 37 38 39
दिवस्पतिर्विडौजाश्च मरुत्वान्मेघवाहनः ॥ ५४ ॥

a क्रौडः b शखिनः c मृक्षमथो d दाक्षायिण्यः, दाक्षरायण्यः, दक्षणायण्यः, e सूत्रामा f स्यादग्रधन्वा g विडोजाश्च ।